IJFMR International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 • Website: www.ijfmr.com • Email: editor@ijfmr.com

# वेदेषुनारी

**निर्यास: (Abstract)**

**शीर्षक: वेदेषुनारी**

**उपक्रम:**

**निर्यास:** मम निबन्धस्य शीर्षक: "वेदेषुनारी" इदं निवन्धमैतिहासिकं च वर्णनात्मकमस्ति । वैदिककाले ब्रह्मवदिन्य: कति: ऋषिकानां नाम यथा घोषा, रोमसा, लोपामुद्रा, विश्ववारा:, शश्वती, अपाला, सूर्या, गार्गी, इन्द्राणी, उर्वशी, शची, सर्पराज्ञी, आदय: मन्त्राणां ब्याख्यां कुर्वन्ति घोषा ब्रह्मचारिणी ऋग-१०-३१-४० सूक्तानां व्याख्या कारिणी अस्ति । वैदिक वाङमयात् ज्ञायते यत् भारतवर्षे नारीणां स्थानं गौरवपूर्णमासीत् । प्राचीन समये स्त्रीणां शिक्षा-दीक्षाणामतीव रमणीयं व्यवस्थासीत् । सामाजिकी कार्येऽपि महत्वपूर्णं दीक्षांदीयते स्म । अध्ययनमध्यापनमतिरिक्तं युद्धभूमि यावत् गत्वा आत्मन: वीरतां प्रदर्शयति स्म । वास्तवेन इत्थं कथ्यते यत्

"इडे रन्ते हब्येकाम्येज्योते

अदिते सरस्वती महीविश्रुति ।

एतातेऽध्ये अध्ननामानि

देवेभ्यो मासुकृतं वृयात् ।" (यजु-८-४३)[१]

हे नारी! त्वं पूजनीया, रमणीया, हवनीया, कामनायोग्या, आल्हाद दायिनी, ज्योतिष्मती, अदिती, विदुषी महनीया, चप्रशंसनीयाऽसि । त्वं हिंसया:नयोग्या, भो देवीस्वरूपा हृदयंगमं कृत्वा मां दीब्यजीवनाय प्रेरयति ।

हृदयंद्वयं जलमिव समानौभवत:-

समंजन्तु विश्वेदेवा:

समाणो हृदयानिनौ ।

संमातरिश्वासंधाता

समुद्रेष्ट्रीं दधातुनौ । (ऋग्वेद-१०-८५-४७)[२]

जलं यथा भिन्नं भिन्नं स्थानादानीय एकत्र स्थाप्यते यदि तदेकाकारं भवन्ति । इत्थं वरकन्ययोः हृदय द्वयं मिलित्वा एकत्र भवति ।

“पतेः दीर्घायुः कामना करोति नारी,

इयं नार्य्युपबुते

पूल्यान्या वपन्तिका

दीर्घायु रस्तुमेपतिः

जीवातिशरदः शतम् । (अथर्व-१४-२-६३)[३]

इयं नारी लाजानामाहुतिं प्रदाय वदति यत्, ममपतिः, दीर्घायुरस्तु । सः शतं वर्षं जीवितं भवतु ।

**इन्द्राणी वैसंनायैदेवता ।**

सेवास्य सेनां संत्यति ॥ (नैःसं.२.२.८.९.)[४] पुनश्च स्त्री पराक्रमी अस्ति । भो स्त्री, त्वमजेय भवति । त्वं विजेता भवसि, यत्रुणाम् विजयं कुरु । त्वं युद्धेच्छुं परास्तं कुरु । त्वमहस्शक्ति संपन्नास्ति । त्वं मां शक्तिप्रदानं कुरु । (यजु-१३-२६)[५] स्त्री वीरजननी । भो स्त्री तव गर्भाशये मम पुंलिगम् आगच्छतु । यथा तुणीरात् सायकाः, तव दशमेमासे जन्मदान वेलाया वीरपुत्रं जनयतु । अत्र विज्ञानस्य वार्त्ताप्रचारिता । यथा पुमान् कथयति यत् मम औरसात् पुंलिगमागच्छतु । यतः स्त्रीं वा पुरुषयोः जन्म पुरुषेषु निर्भरं करोति । (अथर्व-३-२३-२)[६]

इन्द्राणीमेव स्त्रीषु सौभाग्यवती भवति । तस्याः पति कदापि वृद्धवस्थायां न म्रियते । वुद्धिमेव शची तथा इन्द्राणी कथ्यते । बुद्धेः उपरि संसारे किंचिदपि सौभाग्यं नास्ति । संसारे बुद्धेः भिन्नः वैभवं नास्ति । (ऋग-१०-८६-११ अथर्व २०-१२-११) [७] प्राचीनकाले स्त्री सामुहिकं यज्ञे तथा युद्धगच्छति । सत्यस्य विधात्री वीरपुत्रस्य युक्ता, इन्द्राण्याः पूजा भवति । (ऋग-१०-८६-१०, अथर्व २०-१२६-१०)[८]

उपसंहारेण इत्थमुच्यते यत् “स्त्री हिब्रह्मा वभूविथः”, तारपि आजोभिरुगा, सनात्सहन्ति

गृहस्थरपि यज्ञे ब्रह्मानारी एवास्ति । सा पुरुषं जीवनयज्ञे परामर्शं ददाति । स्त्रियः ओजोस्विनः भीरुः निर्वलमवला वानिस्तजं नैवास्ति । पराक्रमैः कठिनगुणस्वभावारस्ति । पराक्रमैः कठिन गुणस्वभावैः तथा सहनशीलाः, उग्रतया साकं मानं सम्मानं च रक्षेयुः । स्त्रियः अनसवैः अनमीवा अश्रुरहिताः रोगरहिताः सन्ति । नारी जीवितानां जननां कृते उदीर्ष्वनायर्मि जीवलोकम् अस्ति । सागृहे साम्राज्ञी स्वरूपा तिष्ठेत् ।

**-इतिशम्-**

International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 • Website: www.ijfmr.com • Email: editor@ijfmr.com

शीर्षक:

# वेदेषुनारी

डा. सुरेशः कुमारः पन्डा
प्राध्यापकः संस्कृतः विभागः
पञ्चायत उच्चमाध्यमिकः विद्यालयः
पलशागोरा, वौद्धः, पिन्-७६२०३०
नगर/पोः- शान्तिनगरपड़ा, बुढ़ीसमलाइप्लद्, सोनपुर
जिल्ला- सुवर्ण्णपुर, ओड़िशा, पिन्- ७६७०१७
मो- ९४३७७०६३८९/७९७८४६८३४१

जिल्लाः- सुवर्ण्णपुर, पिन्- ७६७०१७, ओड़िशा
मोः- ९४३७७०६३८९/७९७८४६८३४१

ॐ

## शीर्षकः वेदेषुनारी

### मंगला चरणम्

वर्णानामर्थ संघानां रसानां छन्दसामपि
णंगलानां च कर्त्तारौ वन्देवाणी विनायकौ ।
त्वमेवमाता च पितात्वमेव । त्वमेव वन्धु च सखा त्वमेव ॥
त्वमेव विद्या द्रविणं त्वमेव । त्वमेव सर्वं ममदेव देव ॥
"घोषा विश्ववारा अपालोपनिषिद्विषत्
ब्रह्मकाया जुहुर्नामा अगस्त्यं स्वसावतः
इन्द्राणी वेदमाताश्च नद्यश्च, यमीनारी च शाश्वती

श्रीः लक्ष्मी सर्पराज्ञी बाक्श्रद्धामेधा च दक्षिणां

रात्री सूर्याच सावित्री ब्रह्मवादिन्यः हरिताः ॥" (शौनक कृता बृहद्देवता, अध्याय २४/२/८४)

तत्र ब्रह्मवादिनिनामुपनयनम्, अग्निन्धनं वेद्याध्यनं स्वगृहे भीक्षाचेति। (हारित धर्मसूत्र-२१/२४)

अर्थात्- ब्रह्मवादिनीनाम् उपनयनम्, अग्निहोत्रं वेदादि शास्त्रमध्ययनम् (अध्यापनम्) एवं स्वगृहे भीक्षाटनं करणीयम्।

**उपक्रमः**

वैदिक वाङ्मये स्वामी दयानन्द कृत वेदभाष्यंनारीणां चित्रमेका तेजस्विनी प्रखरा नारी रुपेण चित्रिता। वेदानां पञ्चसहस्त्र वर्षेभ्यः चिन्तकानां विचारकानामिदृशी रूपेण दर्शनमस्वीकारं कुर्वन्ति स्म। पुरातनेषु शब्दभंड़ारेषु नूतनमर्थानां स्वरूपं चिन्तनं दर्शनमेका क्रान्तिरासीत्।

गृहस्थरूपी यज्ञ ब्रह्मावैनारी अस्ति। सा पुरुष जीवन यज्ञे परामर्शं ददाति। (स्त्रीहिब्रह्माबभूविथ मन्त्र ५) नारीं ब्रह्माइति वदति वेदः। ब्रह्मज्ञानस्य अधिष्ठाता सानविज्ञानेषु सा श्रेष्ठा भवति। इत्थं नारीं ज्ञान विज्ञानेषु निपुणा अतः सा ब्रह्मा इति उच्यते।

ऋग्वेदे इन्द्राण्याः गौरवे वर्णनमस्ति। सा कथयति "अहं समाजे अग्रगण्यामस्मि। अहंमुच्चस्तरस्य वक्ता, विदुषां मध्ये मूर्द्धन्या श्रेष्ठा।"

"स्त्रियः ओजोभिरुग्राः सनात्सहन्ति"। स्त्रियः ओजैः उग्रासन्ति, अवला, भीरु भयशीला, निस्तेजांसि न। पराक्रमैः कठिन स्वभाव गुणसम्पन्ना तथा कष्टं सहनशीला सन्ति। स्त्रियः निर्भिकता साहासैः सहोत्साहैः कार्यं करणीयम्। तथा उग्रतया स्वस्या मानसम्मानानां रक्षां कुर्वन्ति। स्त्रियः अनश्रवः अनमीवां भवेयुः अश्रुरहिताः, रोगशून्याः भवेयुः। सा नारी जीवितानां जनानां कृते उत्तिष्ठति। नारीभिः जीवलोकं भूयते। सा गृहेऽपि साम्राज्ञीनमिवतिष्ठेत्।

"साम्राज्ञी .................................. अधिदेवृषु ॥[1]

वेदेनारीम् उत्तिष्ठिता दण्डायमाना स्थातुम् इच्छति।

उत्तिष्ठनारी पददलितं न भवेत्। ऋग्वेदे-

दशम मन्डले १५९ सूक्ते इत्थं पठनीया।

"अहं केतुरहं .............................. उपाचरेत् ॥ (ऋग्-१०मन्डल-१५९ सूक्त-२ मन्त्रः)[2]

अहं ध्वजातुल्य यश वैभवस्य प्रतीकं भवामि। शीर्षसममादरणीया अस्मि, वलयुक्त, तेजस्विनी वक्तृत्व संपन्नं विविध वचनं कथने समर्थं व शत्रुणामुपरि विजयीनि भवेयम्।

"अहं सजया अस्मि", अहमुत्तमं जय प्राप्तवतीमस्मि।

"शमजेषमिमा अहं सपन्वी भिमुतरी।

यथाहमस्य वीरस्य विराजानि जनस्यच ।"

अहं शत्रु यूथं परास्तं कुर्वाणा प्रजाजनैः सह दीप्तं भवामि । तथा प्रतिष्ठा अर्जितं करोमि ।

वैदिकाकाले कति-ब्रह्मवादिन्यः, ऋषिकानां नामानि यथा- घोषा, रोमशा, लोपामुद्रा, विश्ववारा, शश्वती, अपाला, सूर्या, इन्द्राणी, उर्वशी, शची, इन्द्रमातरः, सार्पराज्ञी आदयः मन्त्राणां व्याख्यांनि कृतानिमासन् ।

ऋग्वेदे २४ अथर्व वेदे- ५ वैदिक ऋषिकानामुल्लखितानि सन्ति । ताः वैदिकमन्त्राणां दर्शनं कृतबत्यः । ऋग्वेदे २४ ऋषिकानां दृष्टमन्त्राः २२४ (द्विशतं चतुर्विंशतिः) भवन्ति । अथर्व वेदे ५ ऋषिकानां दृष्टांमन्त्राणां संख्या १९८ (एकशतम् अष्टनवति) सन्ति । इत्थमुभयोर्वेदे ऋषिकानां दृष्टमन्त्राणां संख्या ४२२ (द्वाविंशत्याधिकं चतुः शतम्) भवन्ति ।

**संदर्भ मन्त्राः**

१. "साम्राज्ञी स्वशुरेभव सम्राज्ञी स्वश्रूषां भव । मनान्तरि साम्राज्ञी भव साम्राज्ञी अधिदेवृषु ॥[१]

२. "अहं केतुरहं मुर्द्धाहमुगाविवाचनी । ममेदनु क्रतुंपतिः सहानाया उपाचरेत् ॥

(ऋग्-१०म -१५९ सू-२ म)[२]

इन्द्राणी ........................ प्रथमाजितामुषितापुरः । अथर्व-१-२७-४[१]

अत्र उच्यते यत् इन्द्राणी सेनायाः नेतृत्वं करोतु । सा सर्वदा विजयिनी भवति । इत्थं परिज्ञायते यत् वैदिककाले नारी अपि पुरुषतुल्यं शिक्षा दीक्षाणां समानाधिकारा प्राप्तमासीत् । नारी अर्द्धांगिनी भवति । सा आत्मनः अर्द्धांशा भवति । (अर्द्धो वा एष आत्मनः यत् पत्नी । तैतिः ब्राह्मणः ३.३.३.५)[२] नारीं विना यज्ञ अपूर्णं भवति । अतः सपत्निक यज्ञं कुर्यात् । (अयज्ञो वा एषः याऽपत्नीकः) तैतिः ब्राः-२.२.२.६)[३] पत्नी विना जीवनानि असंपूर्णानि । (यावत् जायां न विन्दते, असवोहितावत् भवति । शतपथ ब्राः ५.२.१.१०)[४] पत्नी गार्हपत्याग्नि अस्ति (जाया गार्हपत्यः (अग्निः) ऐतः ब्राः८.२४.[५] स्त्रीणामपमानं निन्दनीयम् । (नवै स्त्रीयंघ्नन्ति शतः ब्राः ११.४.३.२.)[६] पत्नी गृहलक्ष्मी साक्षात् श्री (श्रिया वा एतद् रूपं यत् पत्न्य) तैतिःब्राः३.९.४.७.)[७] यत्रनार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः । यत्रैतास्तुनपूज्यन्ते, सर्वास्तत्राफलाः क्रियाः मनु ३.५.६)[८] अतः मनुना कथ्यते- ये[८] स्वस्यपरिवारस्य कल्याणमिच्छन्ति ते सर्वे स्त्रीणां सम्मानं कुर्य्युः । ताः आभूषणादिषु अलंकृतं कुर्युः । (मनु-३.५.९)[९]

(२) त्रेतायुगेनारी

त्रेतायुगे कैकेयी युद्धविद्या तथा रणसंचालने निपुणा स्वस्याः पतेः दशरथस्य विजयश्रीणां कारणं भवति । तथा द्वयोः वरयोः वचनानि प्राप्तानि । वाल्मीकि रामायणे एकस्पष्टं प्रमाणं प्राप्यते यत्- महर्षि सूतीक्ष्मात् विदाय वेलायां यदा राम, सीता तथा लक्ष्मणः दण्डकारण्यं प्रति गच्छन्ति तदा सीता रामं वदति, आर्य शस्त्रधारणे कृते वुद्धिर्मलिनत्वं भजति । अत्र

सीता एका राजनैतिकि तथ्यस्य उद्घाटनं करोति । तदा व्यक्तिः सदा काले शस्त्रं धारणं करोति चेत् हिंसामयी भवति । अदय सर्वनिरस्त्रीकरणं सम्मेलनेषु अस्त्रशस्त्राणां नियन्त्रणाय इदं तर्क प्रददाति । यत् यथा मात्राधिकं शस्त्र संचयं भवेत् । तेषां प्रयोगानामीच्छा तादृशी वलवती भविष्यति ।

(३) नार्यः गुणाः

ऋग्वेदे वर्णनामस्ति यद् नार्यः नरमाकृष्टार्थ शक्तयः सन्ति । याभिः सक्तिभिः सौन्दर्य्यं प्रेम्णामाकृष्टं करोति । (मन्त्र २३) अथर्व वेदे अस्ति यत् प्रेम्णराधारः नारी अस्ति । प्रणयीब्यक्तेः हृदयः स्वकीय प्रेमिकायां लग्नं भवति । (मन्त्र २४) सतीसाध्वी नार्यः एका विशेषं गुणं वर्त्तते यत् तस्याः पतिः दीर्घायुः भवति । तथा तस्याः स्त्रीयः सौभाग्यं चिरस्थायी भवति । वृद्धावस्थायाः तस्याः पतिं प्रति प्रभावं ना आयाति । अतः सः दीर्घायुः भवति । (मन्त्र ६१)

**संदर्भ मन्त्राः**

१. इन्द्राणी अथर्ववेदेः- उक्तमस्ति यत् ।

इन्द्राण्येतु प्रथमाजितामुषितापुरः । अथर्व-१-२७-४[१]

(४) नार्यः समाजिकी अधिकारः

ऋग्वेदे नारीं गृहलक्ष्मी रूपेण चित्रिता । तां कल्याणीं जाय अर्थात् मंगलकारिणी स्त्री उच्यते । नारी स्वयं वदति- अहं केतुरहं मूर्द्धाहमुग्रा विवाचनी । ममेदनु क्रतुंपतिः सेहानाया उपाचरेत् । (मन्त्र २) अहं ध्वजातुल्यं यशवैभवस्यचिन्हं प्रतीकमस्मि । शीर्षसमादरणीयास्मि । वलयुक्तं तेजस्विनी वक्तृत्वं सम्पन्नां विविध वचनानां कथनैः समर्थाः एवं शत्रुपरि विजय प्राप्तवाती अस्मि । अहं संजयास्मि अहमुत्तमविजयं प्राप्तास्मि ।

शमजैषमिभा ..........................जनस्य च । (६) (ऋगम-१०-सूक्त-१५९)[१]

अहं शत्रुदलं पराभूतं कत्री भूत्वा प्रजाजनैः साकं दीप्तं तथा प्रतिष्ठाम् अर्जितं करोमि ।

(५) राष्ट्रीय अधिकारं च कर्त्तव्यम्

नारीं प्रति जागरुक शीक्षादीयते । जागरुकं तथा स्वकर्त्तव्यानि प्रति सचेष्टं नारी सुखमयी जीवनमतिवाहयति स्म । दीर्घायु च भवति । (मन्त्र १९) नारीं समाजे विशिष्ट स्थानं प्राप्तये आवश्यकं ज्ञानं दीयते । दीनं-दुखितानां सहायतार्थं तथा निर्द्धनानां कामना-पूर्त्तिं करोतु इति । (मन्त्र ४२)

नारी ओजस्विनी भवेत । अत्र स्वकीयां चरित्रस्य रक्षायाः सामर्थ्थं भवेत् । सा समाजे स्वकीयां अधिकारं स्थापितं कुर्यात् । (मन्त्र ५१) । तस्याः सौभाग्यं सूर्यतुल्यं प्रतिदिनं वर्द्धयेत् । (मन्त्र ५५) सा वीर-पुत्राणां जन्म प्रददातु । यः राष्ट्रस्य सुरक्षार्थं तथा शत्रुणां नाशं कुर्यात् । (मन्त्र ५३)

नारी अजेय तथा शत्रु विजयिनी निर्देशं कृतम् । तस्यां कृते सहस्त्रवीर्यां शब्दं प्रयोगं भवति । तस्य अभिप्रायं भवेत् यत् तस्याः एकप्रकारं नैव परन्तु सहस्त्र प्रकाराणां सामर्थ्थमस्ति । (मन्त्र ४७) (४८ मन्त्रे) अस्मिन् स्त्रीं सेनां युद्धाय प्रेरणस्य

वर्णनमस्ति । नारीं शत्रुविजयिनीम् उक्तवा शत्रुणां तेज हरणकारी निर्देशितवती । (मन्त्र ४९) सा संकोचं त्यक्त्वा अग्रणी भवति तथा अज्ञानरूपी अन्धकारं दूरी करोति । (मन्त्र ५०)

इन्द्राणीं सेनानी रूपेण प्रस्तुता कृता । सा अजेया सेनायाः अग्रेचलति । तस्याः पादयुगेशक्ति विद्यमाना अस्ति । (मन्त्र ४४) सा शिवदेवस्य पिनाकं धृत्वा महान् धनुः धृत्वा शत्रोः सेनां भग्नं कृत्वा अग्रेसरति । (मन्त्र ४५)

तैत्तिरीय संहितायां कथितमस्ति यत् इन्द्राणी सेनायाः देवमस्ति । सा सेनायाः सुप्राणानि प्रददाति । तस्याः नेतृत्वेन निर्वलासेनापि सवलां भवति । इन्द्राणीवै सेनायै देवता । सेवास्य सेनां सं श्यति । (तैत्तिःसं.२.२.८.१)

**संदर्भ मन्त्राः**

१. शमजैषमिभा अहं सपत्नीरभिभूवरी ।

यता हमस्यवीरस्य विराजानि जनस्य च । (६) (ऋगम-१०-सूक्त-१५९)[1]

एकमन्त्रे कन्यानां नृत्यकलायाः शिक्षायाः संकेतमस्ति । उपादेव्यारेका नर्त्तकीतुल्या नृत्यं कुर्वाणा प्रस्तुत कृताम् । (मन्त्र २२) । नारीणां श्रृंगाराणामपि उल्लेखमस्ति । सा सुन्दरं वस्त्र स्वर्णाभरणानि धारयति (मन्त्र ३२) समृद्धास्त्रीयः पर्य्यंशके शयनं रचयति । सुवासितं द्रव्यं विलेपितं करोति । (मन्त्र ४३)

ऋग्वेदस्य एकसूक्ते द्युतं राष्ट्रस्य अहितकारी दुर्व्यसनं निर्देशितम् । द्युतकारीणः स्त्री सर्वदा दुःखिता भवति । तस्याः समाजे सर्वदा अपमानं भवति । द्युतमेकमेतादृशं दुर्व्यसनं भवति, यत्- माता, पिता, पत्नीः, श्वशुरः, श्वशृणां निवारणेऽपि द्युतकारी द्युतं समाप्तं न करोति । परिणामे सर्वत्र तस्य अपमानं भवति । (मन्त्र १५ तः १७)

नारी विपदिस्वामिनमुपदेशं प्रददाति, यथा-

काव्यं ............................... युजे । (मम्मट मतेन)[1]

काव्यकलादि अध्ययने अर्थ प्राप्तिं भवति । व्यवहार शिक्षां प्राप्यते । अमंगलस्य क्षतं नष्टंवा करोति । शत्रुणां निवृत्तये शिक्षा प्रदानं करोति । कान्ता विपदि स्वामिनं प्रति उपदेशं प्रददाति । लौकिक संस्कृते इत्थं प्राप्यते ।

(६) सूर्या स्वकीयापतिं स्तौति

मन्त्रः-

"सत्येनोत्तभिता भूमिः सूर्येणोत्तभिताद्यौः ।

ऋते नादित्यास्तिष्ठन्ति दिवि सोभो अधिश्रितः ।"

सत्यं धर्मेण एव पृथ्वी (सत्यादिद्वारा) फलित भवति । सूर्यदेवेन द्युलोकः फलितं भवति । यज्ञेन अदितेः पुत्रः (सर्वेदेवाः) तिष्ठन्ति, तथा धुलोके देवानामाल्हादकारी सोमदेव अधितिष्ठति । (शब्दार्थ- उत्तभिता-तिष्ठति, ऋतेन-यज्ञेन,

आदित्याः-आदिपुत्र-सर्वेदेवाः, अधिश्रितः-अवस्थिताः । (६) रैभ्यासीदनुदेयी नयशंसन्योचनी । सूर्याया भद्रमिद्वासो गाथयेति परिष्कृतम् ।

(मन्त्रेस्मिन सूर्या स्वकीयाः विवाहस्य कथां प्रास्तौति) रैभीनभाऋचा एव विवाहादनन्तरं (......... साकं विनोदार्थं) एका सखी आसीत् मनुष्यैः स्तुतं मन्त्राः बध्वार्थं दीयमाना) दासी आसीत् । (सूर्याया) दुकुलादि आच्छादकं वस्त्रं गायमाना गाथया अलंकृतासीत् ।

**संदर्भ मन्त्राः**

१. काव्यं यशसे अर्थकृते ब्यबहारविदे शिवेतर क्षतये

सदयः परः निवृत्तये कान्ता सम्मित तया उपदेश युजे । (मम्मट मतेन)[१]

(७) घोषा काक्षीवती १८ मन्त्राः

१०-३९ च १०.४०

देवता-अश्विनीकुमारौ । छन्द जगती

भो- कर्म प्रदायकौ अश्विनौ-भवन्तौ दिप्तिमन्तौ प्रातः काल यज्ञे गच्छन्त्यौ व्यापकौ तथा मानवान् प्रति प्रतिदिनं धनं दानवन्तौ तथा गतिशीलौ मम यज्ञं रथं प्रति आननाय कः विलम्बं करोति ।

१०-३९- यो वां ......................... हवामहे । (१)[१] (ऋग्-१०सू-३९-१मः)

है अश्विनौकुमारौ! भवन्तौ दिवारात्रं यजमानस्य आह्वानेन गन्ता रथः यौग्यः । भवन्तौ शौभने आह्वानेन रथं वयं चिरंतनमाह्वयामः ।

२. योदयन्तं सुनृताः पिन्वन्तं धिय उत्पुरन्धीरी रयंततदुश्मसि यशसंभागं कृणुतं नौ अश्विनासोमं नचारुं मधवत्सुनस्कृतम् । (२)

भो अश्विनीकुमारौ- भवन्तौ वाणीं प्ररितं करुताम् । अस्माकं कर्मपूर्णं करोतु तथा प्रभूत प्रज्ञानमउत्पन्तौ करुताम् । त्रयःवयं कामयामहे । अस्माकं कृतेश्मश्वी तथा सेवनीयं धनादीनं कल्याणकारी सोमेन समः अस्मान् धनवान् करुताम् ।

४. युवं................प्रवाच्या । (४)[२] (ऋ-१०-३९-४)

भो अश्विनौ भवन्तौ जीर्णं य्यवन ऋषिं तरुणं कृतवन्तौ यथा जीर्णरथं विनिर्माय चलनयोग्यं कुर्वन्तौ । भवदयां तुगपुत्रं भूज्यं समुद्रोपरि उदवहनं कृतौ । भवन्तौ कर्माणि यज्ञे वचनेयोग्यं भवेत् ।

विःद्रः- सनयं-पुरातनम्, तक्षयुः-कुर्वन्तौ ।

२. कुह...................सधस्थ ओ । ऋषिकया घोषया परिज्ञायते यत् ।

भो अश्विनौ! भवन्तौ दिवायां, रात्रौ, तथा कुत्र भवन्तौ निवसतः। कः यजमानः भवन्तौ स्वेषां वेदौ आह्वायितुं शक्नोति? विधवानारी यथा स्वस्या पतेः भ्रातरमभिमुखं करोति। अस्मात् मन्त्रात् परिज्ञायते यत् विधवा विवाह प्रथा देवरं प्रति आसीत्।

**संदर्भ मन्त्राः**

१. यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता

शश्वत्तमासस्तमु वामिदं वयं पितुर्न सुहवं हवामहे। (१)[१] (ऋग्-१०सू-३९-१मः)

२. युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः।

निष्टौग्रयमूहथुरभ्दयस्परि विश्वेत्ता वां सवनेषु प्रवाच्या। (४)[२] (ऋ-१०-३९-४)

४. युवां मृगेव............शुभस्पती। (४)[१] (ऋग-१०-सू-४०-४म)

व्याघ्रः यथा हस्ति, सिंहादिं अहिण्डयते तथा वयं भवन्तौ वेदौ आह्वानं कुर्मः। भो यज्ञस्यनेत्। अश्विनौ भवन्तौ प्राप्यते होमग्निषु आह्वानं कुर्वन्ति। येन भवन्तौ वृष्टिजलेन जनान् अन्नप्राप्तं कारयतः। अस्मात् मन्त्रात् ऋषिकानां जनानां कृते ऋषिकायाः प्रर्थना वदति यत् कृषकानां कृते जलप्रार्थनां कृत्वा संसारार्थं जलं याचनां कृत्व

। सृष्टेः अन्नाय प्रार्थयन्ति। येन जलेनवै अन्नामुत्पादनं कुर्वन्ति।

१०.११. जीवं................परिष्वजे। (१०)[२] (ऋग-१०-सू-४०-१०म)

आश्विनौ भवतौः कुयातः स्त्रीणामुपरि दीर्घभूजौ आलिंगनं करोति स्त्रीयरपि तं सन्तानार्थमालिंगनानि कुर्वन्ति। अस्मिन मन्त्रे स्त्रियः संसारार्थं सुन्दराणि पुत्रसंतानांनिजातं कुर्वन्ति।

८. सिकतानिवावरी-ऋषिगण-९-८६-२०,१-१२१

ऋषिका इन्द्राणी- देवता इन्द्रः, छन्दपंक्ति। मन्डल-१०, सूक्त-८६, प्रिया तिष्ठानि.................उत्तरः। (१०-८६-५)

इन्द्राणी एकावीरा रमणी भवति स्म। तस्याः पति इन्द्रार्थं समर्पितवती। इन्द्राणीतः अन्या कोऽपिनास्ति। वृषाकपिनं प्रति साकुपिता आसीत्।

सत्य विधायिनी पुत्रवती इन्द्रपत्नी यज्ञवासंग्रामे प्रथमतया गच्छति। (याति) तथा स्तोत्रैः स्तुता भवति। यतः तस्याः पति इन्द्रः सर्वश्रेष्ठः। इन्द्राणीमासु...........उत्तरः। ११

अस्मिन् मन्त्रै इन्द्रदेवः इन्द्राणीं स्तौति। भो इन्द्राणी! अहं सौभाग्यशालिनि स्त्रीणां मध्ये भवतीं इन्द्रायाः पोषकः अन्यप्राणिनांमिव वयोहनितया न म्रियते। अतः सः उत्तृष्टः। भो इन्द्राणी अहं मम मित्रतुल्यं वृषाकपिं नैवानन्दितम्। वृषाकप्यः हविः मां प्रत्यागच्छति।

९. अपाला आत्रेयी ऋषिका (१९) देवता-इन्द्र छन्द अनुष्टुप्, १-२ पंक्ति

१. कन्या...............सुनवैत्वा म-८-सूक्त-९१-म-१

शटयायन ब्राह्मणे कथा अस्ति यत् अत्रिसुतामपाला चर्मरोगेण पीडितासीत् । अतः पतिः तां तस्मात् गृहात् वहिः निः सारयति । पितुराश्रमे तिष्ठन्काले सा एकस्मिन् दिनेस्नानार्थमागता । मार्गे सा सोमलतां प्राप्तवति । तया दन्तैः पिसितेः इन्द्रदेवः तत्रागतवान् । तेन दन्ताभिष्युतं सोमं पानं कृतवान् । पुनः अपालां तस्याः अभिष्ट वरं प्रदानमकोरत् ।

**संदर्भ मन्त्राः**

१. युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे ।
युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती । (४)[१] (ऋग-१०-सू-४०-४म)

२. जीवं रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्योः जनयः परिष्वजे । (१०)[२] (ऋग-१०-सू-४०-१०म)

स्नानार्थं गतवती अपाला नाम्ना स्त्री मार्गे सोमं प्राप्तवती सोमं गृह मनयनवेलायां सोमम् उक्तवती भो सोम! त्वाम इन्द्रदेवाय दन्तैरभिष्यूतां करिष्यामि । त्वाम् अहं तमथर्मिंद्र देवाय पेषणं करिष्यामि । (पश्चात् इन्द्रः दन्तध्वनिं ग्रावं ध्वनिं श्रुत्वा इन्द्रागतवान् ।

४. कुविच्छ कक्तुवित्कुवित्रो.........संगमामहै । (४)

भो इन्द्रदेव! अस्मान् चतुः समर्थ करोतु । सः महयंप्रभूतं धनदानं करोतु । तथा इन्द्रदेवहि मह्यं भूयः भूयः धनेन संपृक्तं करोतु । प्रथमं (त्वगदोषात्) पतिषा वहुवारं द्विष्टः भूत्वासंनिकट आगतवती अहमीन्द्रदेवेन साकं संयुक्तो भवामि ।

१०. श्रद्धयाग्निः................वेदयामसि । (१) (ऋग्-१०मन्डल, सूक्त-१५१)[१]

पुरुषगतमभिलाया विशेष (श्रद्धया) द्वारा एव गार्हपत्यादि अग्नि संदिप्तं भवति । आदरातिशया श्रद्धया पुरोडाशादीहविः आहवनीयाग्नौ प्रक्षितं क्रियते । सेवनीयं तद्धनं प्रधान मूतस्थाने अवस्थिताश्रद्धायाः अभिमानिनि देवतां महं स्तुत्या आवहयामि इति । इति ऋषिकायारुक्तिः । यत् श्रद्धां विना किञ्चिदपि कार्यं न सिद्धिं भवति । अतः कार्येषु इत्युक्ते यज्ञादिष्वपि श्रद्धाकर्म करणीयाः यतः ।

२. प्रियंश्रद्धे.............उदितं कृधि । १०-१५१-२

भो श्रद्धे- चरुपुरोडाशादि अर्पितवन्तं यजमानं अभीष्टं फलं प्रददातु । हेश्रद्धे! भवती दानं दादानान् प्रति अपि फलप्रदा भवतु । अस्माकं भोगर्थिनां कृतेऽपि यज्ञं संपादनं कुर्वाणामपि भवती अभीष्टं फलं प्रददातु ।

५. श्रद्धां......................श्रद्धापयेहनः । (५)

वयं पूर्वान्हे श्रद्धा देवीनमाह्वनं कुर्मः । वयं दिवसेऽपि तामाह्वानं कुर्मः । दिवसान्ते संध्यायामपि तामाह्वानं कुर्मः । अतः भो श्रद्धादेवी भवती अस्मान् पृथिव्यां श्रद्धामयी करोतु । यतः भवतीं विना किमपि कार्यं सफलं वा फलवतीं न भवति । भो श्रद्धादेवी नमस्तुभ्यम् । अर्थात् ऋषिकायाः उक्तिः यत् श्रद्धां विना अस्माकं किंचिदपि कार्यं न सफलं भवति ।

११. शचिपौलमी, शचिपौलमी, आत्मतुष्टि, धन्द अनृम् ।

१. उदशै सूर्या सूर्यो.................विषासहिं । (१०-१५९-१)

धुलोकस्य सूर्यदेव यः उदयं प्राप्तवन्तौ । मम सेवनीय इन्द्रदेवहि सूर्यरूपेण अदितम् भवति । सः उदित सूर्यदेवस्यं तेजसं ज्ञानमहं शत्रुणां विशेषपराभूतं कृत्वास्य सपत्यीनां पराभूतं कुर्याम् ।

२. अहं केतुरहं..................उपाचरेत् I (२) (ऋग्-१५९-२)

अहं वैसार्वेषां ज्ञाताः अहमपि शरीरमध्ये मस्तकं यथा प्रधानं भवामि I अहमपि वयस्कं पतिंमपि सदाप्रियवचन युक्तम् करोमि I तथा सपत्नीम् आक्रान्तं करणाय अस्माकं वुद्धिं संलक्ष्य अस्माकं पतिदेवाः अस्मान् निकषा आगच्छन्तु I

**संदर्भ मन्त्राः**

१. श्रद्धयाग्निः समिध्यते श्रद्धया हुयते हविः I

श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि II (ऋग्-१०मन्डल, सूक्त-१५१-१)[१]

(१२) वीरप्रसविनी

भो नारी! त्वं राष्ट्राणां वीराणां जननी I राष्ट्राणां विदुषां जननी I राष्ट्रस्य वैज्ञानिकानां, शिल्पीनां तथा कलाकाराणां जननी असि I राष्ट्रस्य सूत्रधारणकारिणां तथा राजपुरुषाणां जननी अस्ति I राष्ट्रस्य उत्थानाय प्रेरणा प्रदानकारिणी सर्वस्वत्यागी ब्राह्मणस्य जननी असि I राष्ट्र रक्षार्थम् आत्मानं वलिदानं दानशीलानां क्षित्रीयाणां जननी I राष्ट्रं समृद्धेः शिकरोपरि प्रापकानां उदयोगिनां जननी असि I वेदे राष्ट्रस्य यथा सन्तानानां काम्यते ते सन्तानाः तव कुक्षितः जाताः निभवन्ति I राष्ट्रार्थं किदृशः सन्तानस्यावश्यकः त्वं वेदस्य शब्दौः शृणुत I

स्वायुधं ........................ रचिदाः II (ऋग-मन्डल-१०-सूक्त-४७-म-२)[१]

अस्माकं राष्ट्रम् इत्थमद्भुतं सन्तानानिप्राप्तानिभवन्तु ये उत्कृष्टं शस्त्राणां चालने सिद्धहस्ताः तथा उत्तमेन स्वेसां तथा अन्येषां रक्षार्थं प्रवीणाः सम्यक् नेतृत्वं करणार्थमुपयुक्तं, धर्मार्थकाममोक्षरूपं चतु पुरुषार्थं समुद्राणाषावगाहन कुर्वाणाः तथा विविध संपदानां धारकं भवतु I क्रीयाशीलं प्रशंसनीयं बहुनां वरणीय भवेयुः तथा आपदानां निवारकान् भवन्तु I एतादृशाः सन्तानानां जननी भवति I

ममपुत्राः ........................ उत्तमः I (ऋग्-१०-१५९-३मः)[२]

ममपुत्रः शत्रुहस्ता अस्ति I ममपुत्री सर्वथा देदीप्यमानाऽस्ति I

सुब्रह्माणं ....................... रयिंदाः I (३) ऋगवेद-१०-४७-३[३]

अस्माकं राष्ट्राणाहकृते अद्भुतं वर्षकं सन्तानं प्राप्तं भवतु, यो त्कृष्टः ज्ञानविज्ञानेन पारंगतं भवेत् I प्रशस्त माता, पितातितियि, मादि देवानां पूजां कृतवन्तं महन्तं विशालं हृदयं भवेत् I

**संदर्भ मन्त्राः**

१. स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् I

चकृत्यै शस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रचिदाः II (ऋग-मन्डल-१०-सूक्त-४७-म-२)[१]

२. ममपुत्राः शत्रुहणोऽधो मे दुहिता विराट् I

उताहमस्मि संजयापत्यौमे श्लोक उत्तमः I (ऋग्-१०-१५९-३मः)[२]

३. सुब्रह्माणं देववन्तं वृहन्तमुरुं गभीरं पृथुध्नमिन्द्र I

International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 • Website: www.ijfmr.com • Email: editor@ijfmr.com

श्रुतऋषि मुग्रमभिभातिषाहमस्मश्यं चित्रंवृषणं रयिंदाः । (३) ऋगवेद-१०-४७-३[3]

### १३. उपसंहारः

इत्थं वेदस्यनारी विविध गुणानां विभूपित, सम्मानं तथा स्नेहस्य पात्री, कत्रीपरायणता, यशस्विनी तथा अतिशयं गरिमामयि मस्ति । इन्द्राण्येतु प्रथमाजीतामुषितापुरः । अथर्वे-१-१७-४ । अत्र कथ्यते यत् इन्द्राणी सैनायाः नेतृत्वं करोतु । सा सदा विजयिनी भवति ।

न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते ।

अत्र गृहिणीं गृहंपदेन सम्बोधितवती ।

अस्मात् नारी कीदृशी वैदिककाले समाजे आवश्यकीया तथा तां विना गृहः गृहंपदवाच्यं न भवति सा अतः तदा नारीणां स्थितिः वहु उच्चस्थाने आसन् ।

### संदर्भ ग्रन्थसूची

१. वेदोमें नारी- पद्मश्री डाः कपिलदेव द्विवेदी । प्रकाशक विश्वभारती इन्स्टिच्युट् ।

२. ऋग्वेद संहिता (हिन्दि) व्याख्या कार, २०१९ संस्करणम् (७म, ८म मन्डल, कन्हया लालजोशी)

३. ऋग्वेद संहिता (हिन्दि व्याख्याकारः कन्हेयालाल योशी) नवम मण्डल-सूक्त-१-११४, २०१९ संस्करणः दशम मन्डलः १-१९१

४. यजुर्वेद- संपादकः श्रीसत्यीवर शास्त्री, २.१०.२०२०

५. आर्यवर्त्तर विदुषीनारी (लेखिका श्रीमती सावित्री)

६. ऋग्वेद भाष्यभूमिका (महर्षि दयानन्द सरस्वती)

७. वेदरे नारी- ओड़िआ अनुवाद शन्नोदेवी ।

८. सत्यार्थ प्रकाशः- महर्षि दयानन्द सरस्वती ।

९. अथर्व वेद- सत्यवीर शास्त्री ।

**इतिशम्**

**श्रीकृष्णार्पितम्**